
श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.24- पंचम सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्॥

नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कन्धः**

**॥ अथ चतुर्विं(म्)शोऽध्यायः ॥**

**श्रीभगवानुवाच**

अथ ते सं(म्)प्रवक्ष्यामि, सां(ङ्)ख्यं(म्) पूर्वैर्विनिश्चितम् ।
यद् विज्ञाय पुमान् सद्यो, जह्याद् वैकल्पिकं(म्) भ्रमम् ॥ 1॥

आसीज्ज्ञानमथो ह्यर्थ, एकमेवाविकल्पितम् ।
यदा विवेकनिपुणा, आदौ कृतयुगेऽयुगे ॥ 2॥

तन्मायाफलरूपेण, केवलं(न्) निर्विकल्पितम् ।
वाङ्मनोगोचरं(म्) सत्यं(न्), द्विधा समभवद् बृहत्॥ 3॥

तयोरेकतरो ह्यर्थः(फ्), प्रकृतिः(स्) सोभयात्मिका ।
ज्ञानं(न्) त्वन्यतमो भावः(फ्), पुरुषः(स्) सोऽभिधीयते ॥ 4॥

तमो रजः(स्) सत्त्वमिति, प्रकृतेरभवन् गुणाः ।
मया प्रक्षोभ्यमाणायाः(फ्), पुरुषानुमतेन च ॥ 5॥

तेभ्यः(स्) समभवत् सूत्रं(म्), महान् सूत्रेण सं(यँ)युतः।
ततो विकुर्वतो जातोऽ- हं(ङ्)कारो यो विमोहनः ॥ 6॥

वैकारिकस्तैजसश्च, तामसश्चेत्यहं(न्) त्रिवृत् ।
तन्मात्रेन्द्रियमनसां(ङ्), कारणं(ञ्) चिदचिन्मयः ॥ 7॥

अर्थस्तन्मात्रिकाज्जज्ञे, तामसादिन्द्रियाणि च ।
तैजसाद् देवता आसन्- नेकादश च वैकृतात् ॥ 8॥

मया सं(ञ्)चोदिता भावाः(स्), सर्वे सं(म्)हत्यकारिणः।
अण्डमुत्पादयामासुर्- ममायतनमुत्तमम् ॥ 9॥

तस्मिन्नहं(म्) समभव- मण्डे सलिलसं(म्)स्थितौ ।
मम नाभ्यामभूत् पद्मं(वँ), विश्वाख्यं(न्) तत्र चात्मभूः ॥ 10॥

सोऽसृजत्तपसा युक्तो, रजसा मदनुग्रहात् ।
लोकान् सपालान् विश्वात्मा, भूर्भुवः(स्) स्वरिति त्रिधा ॥ 11॥

देवानामोक आसीत् स्वर्- भूतानां(ञ्) च भुवः(फ्) पदम् ।
मर्त्यादीनां(ञ्) च भूर्लोकः(स्), सिद्धानां(न्) त्रितयात् परम् ॥ 12॥

अधोऽसुराणां(न्) नागानां(म्), भूमेरोकोऽसृजत् प्रभुः।
त्रिलोक्यां(ङ्) गतयः(स्) सर्वाः(ख्), कर्मणां(न्) त्रिगुणात्मनाम् ॥ 13॥

योगस्य तपसश्चैव, न्यासस्य गतयोऽमलाः ।
महर्जनस्तपः(स्) सत्यं(म्), भक्तियोगस्य मद्गतिः ॥ 14॥

मया कालात्मना धात्रा, कर्मयुक्तमिदं(ञ्) जगत् ।
गुणप्रवाह एतस्मिन्-नुन्मज्जति निमज्जति ॥ 15॥

अणुर्बृहत् कृशः(स्) स्थूलो, यो यो भावः(फ्) प्रसिध्यति ।
सर्वोऽप्युभयसं(यँ)युक्तः(फ्), प्रकृत्या पुरुषेण च ॥ 16॥

यस्तु यस्यादिरन्तश्च, स वै मध्यं(ञ्) च तस्य सन् ।
विकारो व्यवहारार्थो, यथा तैजसपार्थिवाः ॥ 17॥

यदुपादाय पूर्वस्तु, भावो विकुरुतेऽपरम् ।
आदिरन्तो यदा यस्य, तत् सत्यमभिधीयते ॥ 18॥

प्रकृतिर्ह्यस्योपादान- माधारः(फ्) पुरुषः(फ्) परः ।
सतोऽभिव्यञ्जकः(ख्) कालो, ब्रह्म तत्त्रितयं(न्) त्वहम् ॥ 19॥

सर्गः(फ्) प्रवर्तते तावत्- पौर्वापर्येण नित्यशः ।
महान् गुणविसर्गार्थः(स्), स्थित्यन्तो यावदीक्षणम् ॥ 20॥

विराण्मयाऽऽसाद्यमानो, लोककल्पविकल्पकः।
पं(ञ्)चत्वाय विशेषाय, कल्पते भुवनैः(स्) सह ॥ 21॥

अन्ने प्रलीयते मर्त्य- मन्नं(न्) धानासु लीयते ।
धाना भूमौ प्रलीयन्ते, भूमिर्गन्धे प्रलीयते ॥ 22॥

अप्सु प्रलीयते गन्ध, आपश्च स्वगुणे रसे ।
लीयते ज्योतिषि रसो, ज्योती रूपे प्रलीयते ॥ 23॥

रूपं(वँ) वायौ स च स्पर्शे, लीयते सोऽपि चाम्बरे ।
अम्बरं(म्) शब्दतन्मात्र, इन्द्रियाणि स्वयोनिषु ॥ 24॥

योनिर्वैकारिके सौम्य, लीयते मनसीश्वरे ।
शब्दो भूतादिमप्येति, भूतादिर्महति प्रभुः ॥ 25॥

स लीयते महान् स्वेषु, गुणेषु गुणवत्तमः ।
तेऽव्यक्ते सं(म्)प्रलीयन्ते, तत् काले लीयतेऽव्यये ॥ 26॥

कालो मायामये जीवे, जीव आत्मनि मय्यजे ।
आत्मा केवल आत्मस्थो, विकल्पापायलक्षणः ॥ 27॥

एवमन्वीक्षमाणस्य, कथं(वँ) वैकल्पिको भ्रमः ।
मनसो हृदि तिष्ठेत, व्योम्नीवार्कोदये तमः ॥ 28॥

एष सां(ङ्)ख्यविधिः(फ्) प्रोक्तः(स्), सं(म्)शयग्रन्थिभेदनः।
प्रतिलोमानुलोमाभ्यां(म्), परावरदृशा मया ॥ 29॥

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्)
सं(म्)हितायामेकादशस्कन्धे चतुर्विं(म्)शोऽध्यायः ॥

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

